M. T. B. COLLEGE, SURAT
Manuscripts Library

No Ref,
Ser. 861.

Title: Sabhyābharana
Vishvanatha.

861

सभ्याभरण by विश्वनाथ

Sabhyābharana : Title

Vishvanātha : Author

: Editor

: Year, Vols.

: Publisher

861 : Remarks

Grammar

861

सभा श्रीगणेशायनमः पादारविंदंमहगस्यविष्णोस्तदंकगायाः कमलालयायाः वंदेजगद्बंधमभीष्टसिद्धशक्तिं विघ्नेश्वरंपार्श्वगतंचवंदे १ सकिंकरःश्रीरघुवंशकेतोरहंस्वलानांपरिहासहेतोः स्वकीयसभ्याभरणस्यटीकां करोमिसंक्षिप्तरण भरण
स्यटीतुष्यसुजनावलीकां २ सदाचरणसम्भीतनिगमननिवेदितविधेयताक अभिमतसिद्धिनिरुद्धनिदानदुरित
१ दूरीकरणकरणं रामचंद्रचरणस्मरणमंगलमाचरितमाचारमनुरुध्यनिबध्नाति स्मरामइति यच्चरणरजोपि
तादृग्अनुभावभावितं तच्चरणपरिचरणपराणां जडानामपिमादृशानांभिक्षनवंवाग्विलासलाभेकौतुकयाभवेदि
सत्रकिंचित्रमित्यपिशब्देनसमस्तुचि १ पितरंनमस्करोति यत्कृपेति सर्वीसहचरीत्यर्थः तथाचयत्र्यादृशी
तत्कृपा तत्रवाचामनायासमनायासेनवाविर्भावोभवेदितिभावः चिकीर्षितग्रंथस्यपाणिनीयशास्त्रानुसारि
त्वाच्छास्त्रमूलभूतचतुर्दशसूत्रीप्रवर्तकंशिवं नतिवन्द्येतरपिमंगलमाचरोति आरव्यातुमिति यथाचतुर्दशसूत्रा

स्मरामोरामचंद्रस्यपदपंकजमंजसा यद्रजोरंजिताशिलापिगिरमुज्वला १ यत्कृपालवलीला
याः सर्वावाग्देवतास्वयं तस्मैश्रीविश्वनाथायतातायगुरवेनमः २ आख्यातुमिहयःस्वस्माच्चतुर्द
शढक्कनिनं तावंतिमुनयसूत्राण्युक्तवाननुमःशिवं ३ प्रथमंविदिताम्नायः संज्ञासूपाणिनेकधा व्यध
त्तवेधाइवयस्तस्मैपाणिनयेनमः ४ यःपाणिनीयार्थमणीन् कृतिचिंतादिघर्षणैः संस्कृतानर्थिसाच्चक्रे तंवार्त्ति
कक्रतंभजे ५

णयभूनिमत्तोज्जायंते एवंजगत्यपिचतुर्दशमत्तएवेतिसूचयितुमेवमुक्तये चतुर्दशसूत्रीयउपदिष्टवानित्यर्थः २ शास्त्र
प्रवर्तकंपाणिनिंनमस्करोति प्रथममिति वेदपूर्वकमाम्नायः संज्ञाश्चरूपाणिचनामरूपात्मकंजगत्यथावेधानिर्मि २
मीतथाप्रथमंमहादेवाद्विदितवर्णसमाम्नायःसन् वृध्यादिसंज्ञारामइत्यादिरूपाणिचयोव्यधत्तप्रकटयतीत्यर्थः अत्र
ब्रह्मोपमया पाणिनेस्तादृशोनुभावोनामरूपात्मकप्रपंचवदतिगहनंचशास्त्रस्येतिसूचितं तस्मैपाणिनयेनमइति ४
पाणिनीयार्थविचारकं कात्यायनंनमस्करोति यःपाणिनीयेति आदिशब्दात्दृष्टउक्तदुरुक्तचिंतयोर्ग्रहणं उक्तानुक्तदुरुक्ता
नांचिंतायत्रप्रजायते इतिवार्त्तिकलक्षणात् पाणिनीयार्थमर्थयंतियेतेर्थिनः शिष्यास्तदधीनानुक्तं इत्यर्थः सूत्रा ५
र्थविषयकवितत्तविचारचतुरंमहाभाष्यकारं पतंजलिंनमस्करोति कृपयाति

कृपयेति सूत्रवार्त्तिकस्ववचनानां अतीवगूढार्थानांयेऽर्थाः तत्रयस्यकृपयामहर्षिभिर्जिज्ञासुभिःप्रार्थि
तोयःसूत्रवार्त्तिकस्ववचनव्याख्यातृत्वाद्भाष्यकारस्यव्यक्तिविशदतांअकार्षीत् तत्रहेतुःस्वाद्विवदि
ति यथास्वादिप्रसयोऽर्थत्रयव्यक्तिंकरोति सन्निधानान्नातिपदिस्येवं अर्थत्रयंविशदयतीत्यर्थः ६ एवमिष्ट
देवतादिप्रणतिपरंपरारूपमंगलविस्तृत्य चिकीर्षितग्रंथंअभिधानंख्यापयन् प्रतिजानीते पाणिनीयेति
अत्रश्लेषपरम्परमादृष्टातारूपलक्षणं तनश्लेषोपमादिमुक्ताफलकलितेः पाणिनिप्रणीतशास्त्रार्थकनकेःस
भ्यानामाभरणं सुभाषितप्रे पस्तन्यतइत्यर्थः ७ दोषद शिनःप्रसाह काव्यस्येतिस्पष्टार्थः लीलावतारचरित
चिंतानुरूपमंगलमाचरन् दाशरथिसाम्यापादनेनपुरुषार्थहेतुत्वाच्चशास्त्रस्यदर्शयन् प्रयोजनकथनेनशा
स्त्रारंभंसमर्थयितुमाह रक्षोहेति व्याकरणमेवागमोव्याकरणागमः आगमस्तु व्याकरणस्मृतेर्मूलभूते
श्रुत्यनुमापकत्वात् तन्मूलकत्वाद्विच्छिन्नसंप्रदायकत्वादबाधितार्थप्रतिपादकत्वाच्च तत्रसमभावतारदाश

कृपयाऽकृतसुकृतीयःस्वादिवदर्थत्रयव्यक्तिं भुजगपतेरवतारंप्रणतोस्मिपतंजलिंतमहं ६ पाणि
नीयार्थकनकैः कलितश्लेषमौक्तिकैः तन्यतेरामचंद्रेणसभ्याभरणमुत्तमं ७ काव्यस्यगुणदोषेषु
नात्राशंक्योवुधायतः सूक्तिव्याजेनशास्त्रार्थस्मृतयेयमुपक्रमः ८ रक्षोहानिमिषाविष्कृतकृतधर्म
स्थितिर्जयति व्याकरणागमउदितोऽवतारइवसत्तमोजयति ९ एकःपरहितहेतोः कलिताकारोपिवर्जि
ताकारः वर्णसमाम्नायइहश्रीरामइवेष्टमर्पयतु १०

रथिसत्पक्षेरक्षसांरावणादीनां हानिर्भिना आविष्कृताकृतधर्माणांसर्षीणांदेवानांस्थितिर्येनेत्यर्थः व्याकर
णपक्षेतु रक्षाऊहा अनिमिषेति छेदः आविष्कृतमितिनपुंसकेभावेक्तः तथाचानिमिषस्यसाधुशब्दरूपस्यदेव
स्य आविष्कृतं प्रकटनंअनिमिषाविष्कृतं रक्षाचऊहश्चअनिमिषाविष्कृतंचतेः कृताधर्मस्यस्थितिर्येनेतिसमा
सः ९ श्रीरामोपमयावर्णज्ञानस्याभ्युदयहेतुतां दर्शयन्सकलशास्त्रोपयोगिनीं चतुर्दशसूत्रीमुपक्षिपन्नाशी
र्व्याजेनवर्णोपदेशस्यप्रयोजनमाह एकइति अत्रश्रीरामपदमावृत्त्याउभयत्रसंबध्यते तत्रयथाश्रीरामइह

नाभिमतंफलं वितरति तथा वर्णसमाम्नायोपीष्टं देयादिति क्रियान्वयः कीदृक् वर्णसमाम्नायः श्रीरामइव भरुणा
सप्ता श्रीरामसदृश इत्यर्थः श्रीरामपक्षे नन्दिंद्राादिदेवतानामपीष्टदातृत्वात्प्रसिद्धः श्रीरामे कोविशेष इत्यत आह एक इति
२ सजातीयविजातीयस्वगतभेदशून्यत्वमित्यर्थः तथाचतत्तदधिकारनिर्वाहाय काल्पितब्रह्मादिदेहधारिता तस्यैवेति
कस्तदन्यो भिमतफलमलं दातुमिति भावः नन्वस्मदादिवन्मानुषवेषस्य दाशरथितया प्रसिद्धस्य रामस्य कथमेक
तास्यादित्यत आह वर्जिताकार इति निराकार इत्यर्थः ननु कटककुंडलमुकुटमुद्रिकाद्यलंकृत कादंबिनीरुचि
रुचिरसौदामिनीकमनीयांशुकशोभिततनोर्दाशरथेः कथमिव निराकारताभिधानमुचितमित्यत आह कलिता
कार इति निराकारस्य साकारतामंतरेणासंभवात् मायया मानुषवेषधारीत्यर्थः ननु सीतावियोगजनितविला
पादिना तत्र मायापारतंत्र्यमनुमीयते तथाच आकारोपि मायापारवश्यादेवस्यादित्यत आह कलित इति कलि
तः स्वातंत्र्यादंगीकृत आकारो न तु मायापारवश्यादित्यर्थः तथाच स्वमव्यामोहयंती नानाविधभुवनरचनया
पशुपक्षिमृगमनुष्यादिस्त्रीपुरुषवेषविरचनया देवदेवीब्रह्मेंद्ररुद्रादिवेषविरचनया च स्वपरितोषहेतोरनव
रतमेव नर्तयंतीं मायानटीं साक्षितया नर्तयतो भगवत उत्तरकौशलेश्वरस्य नटकामितया कामिदैन्योद्भवकवि
लापादिकं नटनमात्रमेव न तु वास्तवमिति भावः नन्वर्थक्रियाकारितया मानुषवेषस्य सत्यताकिं न स्यादिति
चेत् भयकंपादिकारिणि मायाभुजंगे व्यभिचारात् चिन्मयेस्मिन्महाविष्णौ ज्ञातेदाशरथेहरा विसादिश्रुः
तिविरोधाच्च ननु यदि नास्ति वस्तुत आकारस्तर्हि किमात्मकता तस्येत्यत आह राम इति रमंतेस्मिन्निति रा
मः खंडानंदस्वरूप इत्यर्थः सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतिभिस्तस्यानंदमयता प्रतिपादनात् ननु तर्हि स्वात्मा
नंद तया स्फुरंतं रामभद्रं सर्वेपि न कथमनायासमासादयंतीत्यत आह श्रीराम इति श्रीप्राप्यो रामः श्रीराम इ २
ति समासः काम्यनिषिद्धपरित्यागपूर्वकमाचरितैः स्वस्ववर्णाश्रमोचितव्यापारैः परिपंथिदुरितनिरस्तिद्वारा ज
निता जानकीजानौ परमप्रेमलक्षणा भक्तिरेव श्रीस्तया विद्या तत्कार्यनिवर्तकब्रह्मात्मैक्यज्ञानजननद्वारा प्रा
प्य इत्यर्थः ननु तर्हि पूर्णकामस्य रामस्य विग्रहग्रहणे किं प्रयोजनमित्यत आह परहितहेतोरिति दुष्टनिग्रहद्वारा
भक्तपरिपालनमेव आकारप्रधनप्रयोजनं भगवतोरित्यर्थः वर्णसमाम्नायपक्षेतु वर्णसमाम्नाय इष्टमर्पयतु लाघ

वेन शास्त्रप्रवृत्तिरूपं प्रयोजनमिष्टपदेनोच्यते ननु केनोपायेन वर्णसमुदायस्य शास्त्रप्रवृत्तौ लाघवसंपादकतेत्याशंक्य तमु
पायमाह परहितहेतोः कलिताकार इति अइउण् इत्यत्र अकारात्परे य इकारादयस्तेषां हितसंज्ञा तेनाकारेणात्तप्रत्याहार
रूपं तद्यथा स्यादेवमर्थकलितांगीकृत अइउण् इत्यत्र सत्ताद्वयः आदिरंत्येनेति वचनादादिमध्यमानां ग्राहकोयथा
स्यादेवमर्थमकारोंगीकार इत्यर्थः अकारग्रहणमिकारादीनामुपलक्षणं ननु अंत्येनसहेति वचनादकारमात्रस्य संज्ञा
त्वेनाभिधानमनुचितमित्याशंक्य तत्राद्यन्तस्यैकशेषायामन्यतमाश्रयेणहितरूपानां कलिताकारपदं तत्र कश्चलत्रयकलौकलौ
इत आकारोयस्य स तथाविधः उलयोरेकत्वमिति इकारस्यापि ग्रहणं परहितहेतोरित्यपि संबध्यते परशब्दस्तु अक् इक् उक् इत्या
दिषु प्राधान्येनोपात्ततरूपोत्कर्षयोग्याकारादिपरः तस्यपरस्य संबंधेन अक् अल् अट् इत्येवसंज्ञास्वरूपलाभरूपंहितं यथा स्या
दित्येवमर्थं सत्कृत् हलु हयवरट् इत्यत्र ककारलकारटकारा इतः प्राप्ता आकाराः स्वरूपं यस्य तादृश इत्यर्थः पुनः कीदृशः वर्जि
ताकार इति वश्चरश्च चश्च वर्चसमासान्तविधेरनित्यत्वात् द्वन्द्वाच्चुदषहान्तात्समाहारे इति टच् ओ भावः वर्चइतआकारोय
स्येतिविग्रहः वर्जिताकार इत्यत्र बहुलाभावकरणे इति रादेजित्यत्र वक्ष्यते परहितहेतोरितीहापि संबध्यते आदिरंत्येपादि
यमानतत्तद्रूपप्राधान्यरूपोत्कर्षयोगिपर इहापि परशब्दः तथाच छव्यर इच् इत्येवमध्यगाना तत्संबंधादादेर्यथास्यादित
दर्थं च छतवू शषसर ऐओच् इति वकाररकारचकारा न प्राप्त आकारः स्वरूपं यस्येत्यर्थः एवंच प्रत्याहारसंपादकतया वर्णा
उदात्तगुणगरिष्ठाः श्लेषपिष्ठाः प्रत्ययोपदेशेषु आयन्नादिसमस्तान्तातधूर्न्वदामहेसततं १
समाम्नायस्य लाघवेन शास्त्रप्रवृत्त्यर्थत्वमित्यागतं एक इति समाम्नायविशेषणं समुदायरूपत्वात्तस्येति दिक् प्राप्तशेषाद्दिर
शेषशास्त्रविषयश्रीविश्वनाथः सुधीर्यधीमंतमरस्तशोभनसमारंभावरंभास्तुतं श्रीसर्व्याकरणस्य साधुविहितो श्रीरामचंद्रा
श्रिधां भाजस्तस्य कृतौ समाश्रिमाद्विराडुल्लास आदिर्गतः १ इति प्रथमोल्लासः उदात्त इति उदात्तैर्गुणैः प्रमदमादिभिर्गरी
यांसः प्रत्ययशब्देन कोदृदर्शप्रथमजायमानमित्यादिश्रुतिसमधिगतदेहत्वमिदज्ञानं ज्ञेयं तदुपदेशे श्लेषिष्ठाः अतिशयेनाश्लि
ष्टाः अज्ञानदावदहनपतितानां प्राणिनां कृपाविहीनतां तामवलोकयितुमसमर्थाः तरति शोकमात्मविदित्यादिश्रुतेस्तरना
लभूतेदृहादावात्मबुद्धिस्तु देहिनां साविद्यातत्कृतो बंधस्तन्नाशो मोक्ष उच्यते इत्यादिवचनैश्च तदपायोपायमात्मतत्त्वज्ञा
नमतिकारुणिकतया सततमेवानुग्रहदृशा पवित्रयंतः प्रपन्नानां प्रकटयंतीत्यत इत्यर्थः उदात्तगुणेत्यनेन भगवद
भिहिता दैवीसंपत् माच अभयं सत्वसंशुद्धिरित्यादि अभिजातस्य भारतेति आयन्नादयस्तु प्रत्यया धुदात्तत्वेनोदात्त

सभ्या गुणा गुरवश्च भवंति केचित् परसंयोगप्रयुक्तं गुरुत्वं लघवोपि धनप्रयुक्तमिव लभंते तदपेक्षया स्वतएव दीर्घाणा भव्या
मेषां गुरुत्वमिति प्रतिशयः तथा फडरवच्छ घप्रत्ययोपदेशकालएव प्रवर्त्तमानत्वात्तत्राक्षिप्राः तथाचायन्नादीना
माद्युदात्तता सिध्यति आयन्नादीनां प्रत्ययोपदेशकाले प्रवृत्तौ घ चक्षितकरणं ज्ञापकं १ विभाषासाकांक्षइति
२ तं प्रणमतेत्यन्वयः तं कमित्यत आह यस्य कुचिदपि कस्मिन्नपि साकांक्षइति अर्थे निर्विभाषा विरुद्धभाषावचन
आकांक्षाविरोधिन भवतीत्यर्थः तत्रान्वये दृष्टांतः लृटइवेति यथा विभाषासाकांक्षइति सूत्रेण साकांक्षे लृटो विभा
षाभवति नैवयस्येति तथा यतः कुचिन्नीष्वपि अवज्ञानमसत्कारोनोदेतीत्यर्थः सर्वानपि आत्मैवेदं सर्वमिति धि
यासत्कारं स्येवेतिभावः तत्र परिभुव इत्यन्वये दृष्टांतः यथा परिपूर्वाद्भुवतेरवज्ञाने परोभुवोवज्ञानइति सूत्रेण घञि
सति उदेति नतथात इति तथा यथा वृत्रप्रत्ययोनिदर्शिहिंसेति सूत्रेण विधीयमानो निंदानीनभजति तथा यं न भजती
त्यर्थः पुनः कीदृशमवदातं वाङ्मनःकायशुद्धमित्यर्थः यद्वा ब्रह्मात्मास्मीदं ज्ञानेन च पवित्रमित्यर्थः यद्वा सच्छब्दः
शोभनं देशकालोचितं वचस्तेन विदितमित्यर्थः पुनः कीदृशं सच्छब्दप्रथितं सच्छब्देन साधुत्वेन ख्यातमित्यर्थः शानचमि

सत्कोपाधिविकारासततं दधतीपरेष्वपि प्रामाण्यं भवति न कस्य न मस्या प्रत्ययसंज्ञेव यस्य धीः स सुधीः ३
– विभाषासाकांक्षे लृट इव न यस्य कुचिदपि कुत्सित्वावज्ञान्तं परिभुव इवोदेति न यतः निषेवन्निंदादीनू वृत्रिवच्च
नयस्तं प्रणमत तावदातं सच्छब्द प्रथितमुदितं शानचमिव २

देतितत्र दृष्टांतः यथा शानच्प्रत्ययः तौ सदिति सत्संज्ञया विदितः तौसदिति तौ ग्रहणस्य लेटः स्थानिक तद्रूपोपाधयः स
प्रहार्थत्वात् शुद्धश्चेति तदर्थ इति दिक् २ सत्कोपाधिविकारेति उपाधिर्लोकख्यापनाय धर्माद्याचरणं विकाराः ३
कामादयः तेभ्युत्कायये त्यर्थः उपाधिर्विषयसंनिधिस्तस्मिन्सति ये विकारादूतिवाऽर्थः परेषु शत्रुष्वपि प्रमाणीकुर्वती
त्यर्थः प्रत्ययसंज्ञापक्षे सत्कोपाधीसनेन प्रकृसुपपदागमाः अपि एकवाक्यापातत्तेनसंबंधेन लक्ष्यंते तथाच तृसादे
प्रकृत्सुपपदोपाधिविकारागमान वर्जयित्वा परेषु प्रणायं दधतीति ३ श्रीरामः शरणंमम ॥